सप्तदशः पाठः

# चरामेति चरामेति

## लृट्लकारः

वयं धीराः वयं वीराः, वयं सर्वत्र निर्भयाः।
चरामो लोकसेवार्थं, प्रचलामो निरन्तरम्।।१।।

विद्युतां मरुतां कोपः, सिंहानां चापि गर्जनम्।
नापि शत्रुभयं क्वापि, अस्मान् रोद्धुं कदाप्यलम्।।२।।

वयमग्रे चलिष्यामः, चलिष्यामो निरन्तरम्।
दुर्जनान् दण्डयिष्यामः रक्षिष्यामश्च सज्जनान्।।३।।

वयमेव करिष्यामः भारतस्यापि मङ्गलम्।
प्रतिष्ठां मातृभूमेश्च नेष्यामः परमोन्नतिम्।।४।।

दैन्यं चैव हरिष्यामः सर्वभारतभूतलात्।
भेदभावविनाशाय, उद्यताः सर्वदा वयम्।।५।।

विनालस्यं करिष्यामः कार्याणि सततं वयम्।
अग्रे अग्रे चलिष्यामः चलिष्यामो निरन्तरम्।।६।।

दुःखानां तु विनाशाय, वर्धनाय सुखस्य च।
सर्वभूतहितार्थाय, चलिष्यामो निरन्तरम्।।७।।

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| चरामेति | = | हम चलें | परम् | = | श्रेष्ठ |
| कदाप्यलम् | = | (कदापि = कभी भी, अलम् = पर्याप्त) | मरुतां | = | हवा का |
| | | | धीराः | = | धैर्यवाले |
| उद्यताः | = | तत्पर हैं | दण्डयिष्यामः | = | दण्ड देंगे |
| लोकसेवार्थं | = | जनता की सेवा के लिए | निरन्तरम् | = | लगातार |
| | | | रोद्धुम् | = | रोकने के लिए |
| सर्वभूतहितार्थाय | = | सब प्राणियों के हित के लिए | | | |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) वयं कस्य सेवार्थं निरन्तरं चलिष्यामः?

(ख) वयं कान् दण्डयिष्यामः?

२. एकवाक्येन उत्तरं लिखत–

(क) भारतभूतलात् वयं किं हरिष्यामः?

(ख) वयं कान् रक्षिष्यामः?

३. पदानां पुरुषं वचनं च लिखत–

| | | पुरुषः | वचनम् |
|---|---|---|---|
| (क) | चलिष्यामः | .................. | .................. |
| (ख) | पठिष्यामि | .................. | .................. |
| (ग) | दण्डयिष्यामः | .................. | .................. |
| (घ) | रक्षिष्यामः | .................. | .................. |
| (ङ) | पठिष्यति | .................. | .................. |

४. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत —

(क) वयमेव भारतस्यापि मङ्गलम् ...............। (करिष्यामः/चलिष्यामः)

(ख) वयं लोकसेवार्थं ...................। (प्रचलामः/रक्षिष्यामः)

(ग) वयं सर्वभारतभूतलात् दैन्यं ..................।(दण्डयिष्यामः/हरिष्यामः)

(घ) वयं भेदभावस्य .............. उद्यताः सर्वदा। (वर्धनाय/विनाशाय)

(ङ) वयं मातृभूमेः प्रतिष्ठां .................। (नेष्यामः/रक्षिष्यामः)

५. उचितं युग्ममेलनम् कुरुत–

| | (अ) | (ब) |
|---|---|---|
| (क) | दुर्जनाय | पुष्पाणि |
| (ख) | पठनाय | देवः |
| (ग) | उद्याने | पुस्तकम् |
| (घ) | मन्दिरे | दण्डः |

६. उदाहरणानुगुणं अन्वयपूर्तिं कुरुत–

वयमग्रे चलिष्यामः, चलिष्यामः निरन्तरम्।
दुर्जनान् दण्डयिष्यामः, रक्षिष्यामश्च सज्जनान्।।

अन्वयः —

वयम् अग्रे चलिष्यामः, निरन्तरं चलिष्यामः,
दुर्जनान् दण्डयिष्यामः, सज्जनान् रक्षिष्यामः च।।

(क) वयम् एव .............. अपि .................करिष्यामः,
मातृभूमेः .......................... परमोन्नतिं नेष्यामः च।

(ख) वयम् ................ विना सततं .............करिष्यामः,
......... ................चलिष्यामः, निरन्तरं .............।

योग्यताविस्तारः —

- लृट्लकारस्य रूपाणि लिखत–
  पठ्, खेल्, खाद्, धाव्, चल्।
- उच्चारणं कुरुत–
  (क) हरिष्यामः (ख) प्रचलामः